श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

॥ नवमणिमालै ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ नवमणिमालै ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

निजपदाश्रितसत्यपदाम्बुजे
सममतिप्रियभक्तहृदावृते।
मितवती जगतीरभिवर्धिताः
सरितमाहरतां हरमौलिगाम्॥ **1.1** ॥

अकुरुतां निजनाट्यभुवं फणाः
परमधर्म इवाभवतीममे।
अगमतां यमजार्थितकर्मणे
शकलशोऽकुरुतां शकटासुरम्॥ **1.2** ॥

पदजुषामतिभोग्यसुधेव ते
कमलजारुणपाणिविमर्दिते।
द्युततुलस्युदितातिसुगन्धिनी
प्रविलसन्मणिनूपुरभूषिते॥ **1.3** ॥

अतनुतं सुतनुं च तदोपलात्
दुरवबोधनवेदशिरोनुते।
उपचितेऽजशिरस्युचिते धृते
उपगतेऽहिपुरं करुणाप्रदे॥ **1.4** ॥

विधृतमकरतनुविवृद्धविचलिताखिलाम्बुधे
मथनशिखरिविधरणाय कमठरूपमापिथ।
समभिपतितदनुजहृद्विदीर्य भूमिमुदधरः
बलवदसुरजठरदारणादुदैश्च ऋतभृते॥ **2.1**॥

निजपदमितनिखिललोक ! पुनरदापयश्च तान्
परशुमुनिपतनुरमारयोऽरिराजमण्डलम्।
विनुतिविमुखदशमुखास्यदशकमाशु दधरिथ
पशुपतनयतनुधरं च समहरोऽसुरं हरे॥ **2.2**॥

दधिथ मुदित इह गिरिं हि द्वारकापुरीति कृष्ण !
सुगतिकलिततुरगवाह ! कलिमलघ्न ! निरुपम।
कलिजदुरितहरमहौषधादिमास्थितोऽन्वहं
निकटगरुडसरिदुदेतसलिलसेवनोत्सुकः॥ **2.3**॥

वचनदेवतेश्वराय चाक्षराण्युपादिशः
प्रणतगरुडमवितु मध्यवासयो निजं ध्वजम्।
अहिपविहितचरणशयनसेवया हि मुमुदिषे
धरणिकलितफणिपुरेश ! विनतसत्य देवराट्॥ **2.4**॥

समुत्पतत्पुरासुरेभ्य आह योऽनृतं मतं
समुद्धरन् गिरिं निवार्य वृष्टिमभ्रविग्रहः।
तरङ्गपूर्णसिन्धुशोषणात्तधन्वहस्त ! भोः !
दयां प्रदाय पापनाशकोऽसि सत्य ! सेविनाम्॥ **3**॥

तेजस्विष्वधिको न चान्य इति यो बाभाति देवाधिराट्
तस्मिन् याति सुगन्धिकुन्तलमहापद्मासिनीवल्लभे।
माघे मासि मखे महोदधिमहातीरेऽभिषेकोत्सवे
लोकानन्दनसैकते स मदनः प्रैतीव तं प्रार्चितुम्॥ **4**॥

चलितशकटमर्दिन् ! सप्तलोकीं ग्रसित्वा
पुनरपि मितवन् ! तामुद्धमन् दाससत्य।
अनलसदृशकामं वित्तमप्यत्यजं तत्
पुनरपि वरिवस्यामेव ते प्राप्नवं च॥ **5.1**॥

अज्ञानेनान्यथाज्ञाने काले त्वं चक्रशङ्खधृत्।
कारुण्यज्ञानदानाय तनुष्वानुग्रहं मयि॥ **5.2**॥

वञ्चनाकृतिं च पूतनां नृशंसशाकटं
मल्लमत्तवारणांश्च भीकरं दिवौकसाम्।
कंसमादितः प्रमर्द्य भूमिधूर्निवारण !
विश्वपाल ! गोकुलेश ! गोपबाल ! गोपते॥ **6.1**॥

अञ्जनातसीसवर्णवर्णनीयविग्रह !
भोगिपूरधिष्ठवारिमुग्दयैकवार्षुक !।
भो वदान्य ! भक्तसत्य ! दिव्यमङ्गलाकृते
ये हि तेऽतिचारुतां न विस्मरन्ति तेऽमराः॥ **6.2**॥

सावर्ण्यस्याञ्जनाभ्भोनिधिमुदिरमयूरेन्द्रनीलोत्पलैश्च
प्राप्तः ! नित्यप्रभोऽहं त्वधम इह विभो ! त्वां श्रितो भक्तसत्य !।
सन्त्रातः ! चक्रपाणे ! करिण उपवसन् ! पत्तनं चार्वहेस्तत्
मा भीरित्येव चोक्त्वा नहि यमभटसात् स्यां तथा पाहि काले॥ **7**॥

विचारिमेघकाननावृताहिपूस्स्थ ! सद्गुणिन् !
उदूढशैल ! धेनुपाल ! शुद्ध ! वासुदेव ! भोः।
स्वकीयकौशलोक्तिसक्तचित्त ! पूतदूत्यभाक्
नियन्तृताभिवृद्धकीर्तिवित्त ! देवनायक !॥ **8.1**॥

स्वभक्तमोहनाशक ! स्वपादरक्तसत्य ! भोः
यदा कटूक्तिकालदूतपाशपाशितो भयात्।
पतेयमाशु पूर्वमेव मेऽभयप्रदोऽच्युत !
बिभीहि मा बिभीहि मा बिभीहि मेति पाहि माम्॥ **8.2**॥

त्वत्सङ्कल्पोऽनुकूलो भवति यदि तदा चेतने देवनाथ !
अज्ञानं चापराधाः विमतिरपि समारूढकामोऽग्निकल्पः।
गर्वश्चापि त्यजन्ति ह्यनुपदमपि तु स्वान्तशिक्षाविहीनं
सोढुं मामक्षमस्त्वं समव करुणया रक्ष्यमन्यद्वृणे किम्॥ **9**॥

अध्यासीनविसीमवैभवगुणाहीशानपूरीशितुः
पादाम्भोजयुगे गिरा सुमनसां पञ्चाशतं प्रोचिवान्।
हृद्यप्राकृतभाषया च शतकं सुद्राविडोक्त्याकृतीः
स्वस्वाख्यानुगुणास्त्रिरत्नविलसन्मालां सुबन्धां तथा॥ **10.1**॥

गाधां कन्तु प्रधानां सुललितघुटिकागाधिका हास्यपूर्णाः
कौबेराक्षिप्रमोदां नवमणिकलितां डोलिकागाधिकाश्च।
एताः प्रीत्या ह्यवोचं नव च भगवतश्शासनस्यानुरूपं
"त्रय्यन्तोक्तार्थजातं त्वमिह विशदये" त्याप्रवं तत्फलं च॥ **10.2**॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् आम्नायचूडागुरुमणिरफणीत् रत्नमालां नवाद्यां
रम्यां तामादितेयोक्तिभिरभिरचितैः हृद्यपद्यैस्समिद्धाम्।
कर्णाटोक्त्यर्थपूर्णां सकलबुधमुदेऽचीकरद्वेवनाथः
श्रीमद्वेदान्तरामानुजगुरुकरुणाशालिगोपालवाचा॥

॥ इति नवमणिमालै सङ्ग्रहः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥